# कृषक:

## (एतद् शब्दस्य प्रयोग:)

**एष:** ओडिशाप्रदेश: । शस्यश्यामलक्षेत्राणां सौन्दर्यम् **एतं** प्रदेशं मण्डयति । **एतस्या:** श्यामलताया: मूलं कृषकस्य श्रम: एव । प्रायत: प्रतिशतम् अशीति: जना: कृषिद्वारा जीवन्ति । बहव: नद्य: **अस्मिन्** प्रदेशे प्रवहन्ति । नदी-प्रवाहात् **एतस्या:** भूमि: उर्वरा । कृषक: हलेन भूमिं कर्षति । **एतेन** भूमि: उत्पादनयोग्या भवति । हलं नाम लाङ्गलम् । **एतस्मात्** कृषिक्षेत्रात् धान्य-मुद्ग-माष-कुल्माष-भूचणकादीनि शस्यानि उत्पादितानि भवन्ति । धान्यम् **एतस्य** प्रदेशस्य प्रधानम् उत्पादनम् । अक्षयतृतीयात: **एतस्मिन्** प्रदेशे कृषिकार्यस्य प्रारम्भ: भवति । कृषक: रौद्रतापस्य सहनं करोति । **एष**: श्रावणस्य वृष्टिद्वारा सिक्त: सन् कृषिकार्यं सम्पादयति । शीतकाले आलुक-वार्ताक-पलाण्डु-लसुन-हरित-मूलक-रक्तवार्ताक-शाकादिभि: क्षेत्रं रमणीयं भवति । कृषक: स्वयं कष्टं करोति । पण्यद्रव्याणि विपणीम् आनयति । एतै: पण्यै: अस्माकं भोजनव्यवस्था रुचिकरी भवति । अत: **एतस्मै** कृषकाय नम: ।

**''जयतु कृषक: । जयतु सैनिक: ।**

| मण्डयति, उर्वरा, कुल्माष:, सिक्त:, वार्ताकम्, विपणीम्, पण्यै: |
|---|



## टिप्पणी

### शब्दार्थ:

मण्डयति - मण्डनं करोति / भूषितं करोति (ମଣ୍ଡନ କରେ) ।

बहवः - बह्व्यः / बहुसंख्याकाः (बहु-शब्दस्य स्त्रीलिङ्गे धेनुवत् रूपम्)(ବହୁତ) ।

कर्षति - कर्षणं करोति (ଚାଷ କରେ) ।

माषः - व्रीहिः - बिरि इति भाषायाम् (ବିରି) ।

भूचणकः - बादाम इति भाषायाम् (ବାଦାମ) ।

सन् - भवन् (ହୋଇ) ।

कुल्माषः - यावकः (କୋଳଥ) ।

सिक्तः - जलार्दितः (ଓଦା) ।

हरितम् - बन्धाकोवि इति भाषायाम् (ବନ୍ଧାକୋବି) ।

## अभ्यासः

**पश्यत, उच्चैः वदत -**

**'एतद्' शब्दस्य पुंलिङ्गे -** **प्रथमाविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| **एषः** गजः | **एतौ** गजौ | **एते** गजाः |
|  |  |  |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | सः | तौ | ते |
| यद् | यः | यौ | ............. |
| किम् | कः | ............. | के |
| सर्व | सर्वः | सर्वौ | सर्वे |
| इदम् | अयम् | इमौ | इमे |

**'एतद्' शब्दस्य पुंलिङ्गे -** **द्वितीयाविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतम् | एतौ | एतान् |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | तम् | ............. | ............. |
| यद् | ............. | ............. | यान् |
| किम् | ............. | कौ | ............. |
| सर्व | सर्वम् | ............. | ............. |
| इदम् | इमम् | इमौ | ............. |

**'एतद्' शब्दस्य पुंलिङ्गे -** **तृतीयाविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतेन | एताभ्याम् | एतैः |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | ............ | ताभ्याम् | .............. |
| यद् | ............. | ............. | यैः |
| किम् | केन | .............. | .............. |
| सर्व | सर्वेण | ................ | ............. |
| इदम् | अनेन | आभ्याम् | एभिः |

**'एतद्' शब्दस्य पुंलिङ्गे -** **चतुर्थीविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतस्मै | एताभ्याम् | एतेभ्यः |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | तस्मै | ............. | ............. |
| यद् | ............. | ............. | येभ्यः |
| किम् | कस्मै | ............. | केभ्यः |
| सर्व | ............. | सर्वाभ्याम् | ............. |
| इदम् | अस्मै | आभ्याम् | एभ्यः |

**'एतद्' शब्दस्य पुंलिङ्गे -** **पञ्चमीविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतस्मात् | एताभ्याम् | एतेभ्यः |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | तस्मात् | ............. | ............. |
| यद् | ............. | याभ्याम् | ............. |
| किम् | ............. | ............. | केभ्यः |
| सर्व | सर्वस्मात् | ............. | ............. |
| इदम् | अस्मात् | आभ्याम् | ............. |

**'एतद्' शब्दस्य पुंलिङ्गे -** **षष्ठीविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतस्य | एतयोः | एतेषाम् |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | तस्य | ............. | ............. |
| यद् | ............. | ............. | येषाम् |
| किम् | ............. | कयोः | ............. |
| सर्व | ............. | ............. | सर्वेषाम् |
| इदम् | अस्य | अनयोः | एषाम् |

**'एतद्' शब्दस्य पुंलिङ्गे -** **सप्तमीविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एतस्मिन् | एतयोः | एतेषु |

**शून्यस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| तद् | ............. | तयोः | ............. |
| यद् | ............. | ............. | येषु |
| किम् | ............. | कयोः | ............. |
| सर्व | ............. | ............. | सर्वेषु |
| इदम् | अस्मिन् | अनयोः | एषु |

**‘एतद्’ शब्दस्य नपुंसकलिङ्गे -**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| **एतत्** फलम् | **एते** फले | **एतानि** फलानि |
|  |  |  |

| | | | |
|---|---|---|---|
| **प्रथमाविभक्तिः** | एतत् फलम् | एते फले | एतानि फलानि |
| तद् | तत् | ते | तानि |
| यद् | यत् | ये | यानि |
| किम् | किम् | के | कानि |
| सर्व | सर्वम् | सर्वे | सर्वाणि |
| इदम् | इदम् | इमे | इमानि |

| | | | |
|---|---|---|---|
| **द्वितीयाविभक्तिः** | एतत् | एते | एतानि |
| तद् | तत् | .......... | .......... |
| यद् | .......... | ये | यानि |
| किम् | .......... | .......... | कानि |
| सर्व | .......... | सर्वे | .......... |
| इदम् | इदम् | .......... | इमानि |

**तृतीयातः सप्तमीं यावत् पुंलिङ्गवत् -**

**पश्यत, लिखत -**

**‘एतद्’ शब्दस्य स्त्रीलिङ्गे -** **प्रथमाविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| **एषा** माला | **एते** माले | **एताः** मालाः |
|  |  |  |

| | | | |
|---|---|---|---|
| तद् | सा | ते | ताः |
| यद् | या | ये | याः |
| किम् | ............. | के | ............. |
| सर्व | सर्वा | सर्वे | सर्वाः |
| इदम् | इयम् | इमे | इमाः |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **द्वितीयाविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एताम् | एते | एताः |
| तद् | ताम् | ............. | ............. |
| यद् | ............. | ............. | याः |
| किम् | ............. | के | ............. |
| सर्व | सर्वाम् | ............. | ............. |
| इदम् | इमाम् | ............. | इमाः |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **तृतीयाविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतया | एताभ्याम् | एताभिः |
| तद् | ............ | ताभ्याम् | .............. |
| यद् | यया | ............. | .............. |
| किम् | ............. | .............. | काभिः |
| सर्व | सर्वया | ............... | ............. |
| इदम् | अनया | आभ्याम् | आभिः |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **चतुर्थीविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्यै | एताभ्याम् | एताभ्यः |
| तद् | तस्यै | ............. | ताभ्यः |
| यद् | ............. | ............. | याभ्यः |
| किम् | कस्यै | ............. | ............. |
| सर्व | ............. | सर्वाभ्याम् | ............. |
| इदम् | अस्यै | ............. | ............. |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **पञ्चमीविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्याः | एताभ्याम् | एताभ्यः |
| तद् | तस्याः | ............. | ............. |
| यद् | ............. | याभ्याम् | ............. |

| | | | |
|---|---|---|---|
| किम् | ............. | ............. | काभ्य: |
| सर्व | सर्वस्या: | ............. | ............. |
| इदम् | अस्या: | ............. | ............. |

**'एतद्' शब्दस्य स्त्रीलिङ्गे - षष्ठीविभक्ति:**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्या: | एतयो: | एतासाम् |
| तद् | तस्या: | ............. | ............. |
| यद् | ............. | ............. | यासाम् |
| किम् | ............. | कयो: | ............. |
| सर्व | ............. | ............. | सर्वासाम् |
| इदम् | अस्या: | अनयो: | आसाम् |

**'एतद्' शब्दस्य स्त्रीलिङ्गे - सप्तमीविभक्ति:**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्याम् | एतयो: | एतासु |
| तद् | ............. | तयो: | ............. |
| यद् | ............. | ............. | यासु |
| किम् | ............. | कयो: | ............. |
| सर्व | ............. | ............. | सर्वासु |
| इदम् | अस्याम् | अनयो: | ............. |

**१. योग्यपदेन शून्यस्थानं पूरयत -**

**उदा-** (क) अध्यापक: <u>तं</u> पृच्छति । (तद् - पुं)

(ख) बालक: ............ पश्यति । (एतद् - स्त्री)

(ग)भगिनी ............... आह्वयति । (यत् - स्त्री)

(घ) ................ मम माता अस्ति । (तद् - स्त्री)

(ङ) ................ पुस्तकं पश्यतु । (एतद् - क्ली)

(च) अहं .............. हस्तेन खादामि ? (किम्-पुं)

(छ) .................. बालिकायै ददातु । (तद्)

(ज) अहं ............. नेत्राभ्यां पश्यामि । (एतद्)

(झ) ..................... जनानां प्रयत्नः अस्ति । (सर्व)

(ञ) .................... लेखन्याः वर्णः कृष्णः । (इदम्)

(ट) वानरः ............. फलानि खादति । (तद्)

(ठ) देवः .............. जनान् रक्षतु । (एतद्)

(ड) वयं पुस्तकस्य ................ कथाः पठामः । (सर्व)

(ढ) ................... हस्तयोः कार्यं किम् ? (इदम्)

(ण) .................. वृद्धिः नास्ति (यत् - स्त्री)

२. **उदाहरणानुसारं शून्यस्थानानि पूरयत -**

**एतद्,, तद् , इदम्**

**यथा-** एतत् भवनं सुन्दरम् अस्ति ।

............... लोकयानेषु सम्मर्दः भवति ।

............... पुस्तकस्य मूल्यं वदतु ।

............... भवने जनाः सन्ति ।

............... पर्वतात् नदी वहति ।

............... नदीजलं निर्मलम् अस्ति ।

............... तरुणयोः आदर्शगुणाः सन्ति ।

............... मित्राय पत्रं लिखामि ।

............... नगरं पश्यामि ।

............... मित्राभ्यां सह अध्ययनं करोमि ।

............... काव्यस्य कर्त्ता कालिदासः ।

............... फेनकेन स्नानं करोमि ।

............... मित्रे स्तः ।

............... युवकेभ्यः क्रीडा रोचते ।

............... शिष्येषु गुरुः स्निह्यति ।

३. **उचितपदेन शून्यस्थानं पूरयत -**

यथा - अयं वृक्षः । <u>अस्य</u> वृक्षस्य फलं मधुरं भवति । (अस्य, अस्याः, तस्याः)

(क) ताः नर्त्तक्यः । ............... नर्त्तकीनां नृत्यम् अद्य अस्ति । (एतेषाम्, एतासां, तासाम्)

(ख) तौ चतुरौ । ............... चतुराभ्यां परितोषिकं ददामि । (एताभ्याम्, ताभ्यां, आभ्याम्)

(ग) सा नदी । ............... नद्यां बहवः मकराः सन्ति । (तस्मिन्, तस्यां, एतस्याम्)

(घ) एते छात्राः । ............... छात्रेषु कः चतुरः स्यात् । (एतेषु, एषु, तेषु)

(ङ) सः पर्वतः । ............... पर्वतात् तिस्रः नद्यः प्रभवन्ति । (अस्मात्, तस्मात्, एतस्मात्)

(च) इमे शिक्षिके । .............. शिक्षिकयोः पाठनेन छात्राः तुष्यन्ति । (अनयोः, एतयोः, एतासाम्)

(छ) ते शिक्षकाः । ............... शिक्षकान् वयं प्रणमामः । (एतान्, इमान्, तान्)

(ज) तानि फलानि ............... फलेभ्यः एकं भवान् नयतु । (ताभ्यः, तेभ्यः, एभ्यः)

(झ) ते घटाः । ............... घटानां वर्णः समानः । (तासाम्, तेषाम्, एषाम्)

(ञ) इमाः नालिकाः । ............... नालिकाभ्यः जलं स्रवति । (आभ्यः, एभ्यः, ताभ्यः)

(ट) अयं मार्गः । ............... मार्गेण गच्छति चेत् नगरं प्राप्नोति ? (एतेन अनेन, अनया)

(ठ) इमे वाहने । ............... वाहनयोः भवत्यै किं रोचते ? (अनयोः, एतासां, तयोः)

(ड) एताः शाटिकाः । ............ शाटिकानां विन्यासः मनोहरः अस्ति । (आसाम्, एतासाम्, तासाम्)

(ढ) इयं मम लेखनी । ............. लेखन्यै पञ्चविंशतिरूप्यकाणि अददाम् । (अस्मै, अस्यै, एतस्यै)

(ण) इमौ चषकौ । ...... चषकाभ्याम् अतिथिभ्यः फलरसं ददातु । (एताभ्याम्, आभ्याम्, एभ्याम्)

४. **उदाहरणं दृष्ट्वा प्रश्नान् लिखत -**

उदाहरणम् - शिक्षकः सुधाखण्डेन लिखति । प्रश्नः - शिक्षकः **केन** लिखति ?

छात्राः हस्ताभ्यां प्रणमन्ति । प्रश्नः - छात्राः **काभ्यां** प्रणमन्ति ?

(क) वैज्ञानिकाः सूक्ष्मदर्शकेन पश्यन्ति । प्रश्नः ................................ ?

(ख) गजाः पादैः चलन्ति । प्रश्नः ................................ ?

(ग) चटकाः चञ्चुभिः भक्षयन्ति । प्रश्नः ................................ ?

(घ) भ्रातरः वाहनैः भ्रमन्ति । प्रश्नः ................................ ?

(ङ) युवकः अङ्गुलिभ्यां शिशुं सूचयति । प्रश्नः ................................ ?

(च) देवाः भक्त्या प्रसन्नाः भवन्ति । प्रश्नः ................................ ?

(छ) पिता स्नेहेन वदति । प्रश्नः ................................ ?

(ज) वयं संस्कृतेन वदामः । प्रश्नः ................................ ?

(झ) त्वं कर्णाभ्यां शृणोषि । प्रश्नः .................................. ?

(ञ) भवन्तः कन्दुकेन क्रीडन्तु । प्रश्नः .................................. ?

(ट) बालिकाः लेखनीभिः लिखन्ति । प्रश्नः .................................. ?

(ठ) मीरा श्रद्धया भजनानि गायति । प्रश्नः .................................. ?

**५. एकपदेन उत्तरं कुरुत -**

(क) केषां सौन्दर्यम् एतं प्रदेशं मण्डयति ?

(ख) श्यामलतायाः मूलं किम् ?

(ग) प्रायतः कति जनाः कृषिद्वारा जीवन्ति ?

(घ) कृषकः केन भूमिं कर्षति ?

(ङ) एतस्य प्रदेशस्य प्रधानम् उत्पादनं किम् ?

(च) कदा कृषिकार्यस्य आरम्भः भवति ?

(छ) कैः क्षेत्रं रमणीयं भवति ?

(ज) कृषकः पण्यद्रव्याणि कुत्र आनयति ?

(झ) पण्यैः अस्माकं का रुचिकरी भवति ?

(ञ) कस्मै नमः ?

**६. शून्यस्थानं पूरयत -**

(क) ............... ओडिशाप्रदेशः ।

(ख) ............... श्यामलतायाः मूलं कृषकस्य श्रमः एव ।

(ग) ............... नद्यः अस्मिन् प्रदेशे वहन्ति ।

(घ) हलं नाम ............... ।

(ङ) धान्यम् एतस्य प्रदेशस्य ............... उत्पादनम् ।

(च) अक्षयतृतीयातः ............... प्रदेशे कृषिकार्यस्य प्रारम्भः भवति ।

(छ) कृषकः ............... कष्टं करोति ।

(ज) पण्यद्रव्याणि ............... आनयति ।

(झ) अतः ............... कृषकाय नमः ।

(ञ) जयतु ............... । जयतु ............... ।

**(सैनिकः, एषः, कृषकः, एतस्याः, एतस्मै, बहवः, विपणीम्, लाङ्गलम्, स्वयम्, प्रधानम्, एतस्मिन्)**

**७. मातृभाषया अनुवादं कुरुत -**

(क) एतस्याः श्यामलतायाः मूलं कृषकस्य श्रमः एव ।

(ख) बहवः नद्यः अस्मिन् प्रदेशे प्रवहन्ति ।

(ग) नदी-प्रवाहात् एतस्याः भूमिः उर्वरा ।

(घ) धान्यम् एतस्य प्रदेशस्य प्रधानम् उत्पादनम् ।

(ङ) एषः श्रावणस्य वृष्टिद्वारा सिक्तः सन् कृषिकार्यं सम्पादयति ।

(च) शाकादिभिः क्षेत्रं रमणीयं भवति ।

(छ) पण्यद्रव्याणि विपणीम् आनयति ।

(ज) अतः एतस्मै कृषकाय नमः ।

(झ) जयतु कृषकः । जयतु सैनिकः ।

**८. विक्षिप्तवर्णैः शब्दं रचयत -**

*उदाहरणम् - ता श्या म ल याः - श्यामलतायाः ।*

| | | | |
|---|---|---|---|
| (१) प्र शे दे | ...................... | (२) भू ण च कः | ...................... |
| (३) प्र न धा म् | ...................... | (४) का ले शी त | ...................... |
| (५) श्रा ण व स्य | ...................... | (६) वि णी प म् | ...................... |
| (७) री क चि रु | ...................... | (८) न आ य ति | ...................... |

**९. स्तम्भमेलनं कुरुत -**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| कृषकस्य | प्रदेशम् |
| एतं | श्रमः |
| भूमिः | पण्यैः |
| हलं | लाङ्गलम् |
| एतैः | उर्वरा |

(उदाहरणम् : एतं — प्रदेशम्)

●